*With Humble Pranams*

*To*

*Sri U.Ve. Mukkur Lakshmi Narasimhachariyar Swamy*

# Taittirīya-Saṃhitā

## Edited by Vijayaraghavan Bashyam

### Book 1, Chapter 4

कृष्ण यजुर्वेदीया तैत्तिरीय संहिता,

प्रथमं काण्डम्, चतुर्थः प्रपाठकः

सुत्यादिने कर्तव्या ग्रहाः

हरि॑ः ॐ

[[1-4-1]]

सोमाभिषवः॥ सोम ऋषिः।

[[1-4-1-1]]

आ द॑दे॒ ग्रावा॑स्यध्वर॒कृद्दे॒वेभ्यो॑ गम्भी॒रमि॒मम॑ध्व॒रं कृ॑ध्युत्त॒मेन॑ प॒विनेन्द्रा॑य॒ सोम॒ꣳ सु॒षु॑तं॒ मधु॑मन्तं॒ पय॑स्वन्तं

वृष्टि॒वनि॒मिन्द्रा॑य त्वा वृत्र॒घ्न इन्द्रा॑य त्वा वृत्र॒तुर॒ इन्द्रा॑य त्वाऽभिमाति॒घ्न इन्द्रा॑य त्वाऽऽदि॒त्यव॑त॒ इन्द्रा॑य त्वा वि॒श्वदे॑व्यावते

श्वात्राः᳚ स्थ॑ वृत्र॒तुरो॒ राधो॑गूर्ता अ॒मृत॑स्य॒ पत्नी॒स्ता दे॑वीर्दे॒वत्रे॒मं य॒ज्ञं ध॒त्तोप॑हूताः॒ सोम॑स्य पिब॒तोप॑हूतो यु॒ष्माक॒म्॥

[[1-4-1-2]]

सोम॑ः पिब॒तु

यत्ते॑ सोम दि॒वि ज्योति॒र्यत् पृ॑थि॒व्यां यदु॒रावन्तरि॑क्षे॒ तेना॒स्मै यज॑मानायो॒रु रा॒या कृ॒ध्यधि॑ दा॒त्रे वो॑च॒ः।

धिष॑णे वी॒डू स॒ती वीडयेथा॒मूर्जं॑ दधाथा॒मूर्जं॑ मे धत्तं॒ आ वा॑ꣳ हि॒ꣳसिषं॒ मा मा॑ हि॒ꣳसिष्ट॒म्

प्रागपा॒गुद॑गध॒राक् तास्त्वा॒ दिश॒ आ धा॑व॒न्त्वम्ब॒ नि ष्व॑र

यत्ते॑ सो॒मादा॑भ्यं॒ नाम॒ जागृ॑वि॒ तस्मै॑ ते सोम॒ सोमा॑य॒ स्वाहा॑॥

[[1-4-2]]

उपां॒शुग्रहः॥ सोम ऋषिः।

[[1-4-2-1]]

वा॒चस्पत॑ये पवस्व वा॒जि॒न् वृषा॒ वृष्णो॑ अ॒ꣳशुभ्यां॒ गभ॑स्तिपूतो दे॒वो दे॒वानां॑ प॒वित्र॑मसि॒ येषां॑ भा॒गो॑ऽसि॒ तेभ्य॑स्त्वा॒

स्वाङ्कृ॑तोऽसि॒ मधु॑मतीर्न॒ इष॑स्कृधि॒ विश्वे॑भ्यस्त्वेन्द्रि॒येभ्यो॑ दि॒व्येभ्य॒ः पार्थि॑वेभ्य॒ः।

मन॑स्त्वाऽष्टु।

उर्व॑न्तरि॑क्ष॒मन्वि॑हि॒

स्वाहा॑ त्वा सुभव॒ः सूर्या॑य

दे॒वेभ्य॑स्त्वा मरीचि॒पेभ्य॑ः।

ए॒ष ते॒ योनि॑ः प्रा॒णाय॑ त्वा॥

[[1-4-3]]

अन्तर्यामग्रहः॥ सोम ऋषिः।

[[1-4-3-1]]

उ॒प॒या॒मगृ॑हीतो ऽसि।

अ॒न्तर्य᳚च्छ मघवन् पा॒हि सोम॑मुरु॒ष्य रा॒यः समिषो॑ यजस्वा॒न्तस्ते॑ दधामि॒ द्यावा॑पृथि॒वी अ॒न्तरु॒र्व᳚न्तरि॑क्षꣳ स॒जोषा॑

दे॒वैरव॑रैः॒ प॒रैश्चान्तर्या॒मे म॑घवन् मादयस्व॒

स्वाङ्कृ॑तो ऽसि॒ मधु॑मतीर्न॒ इष॑स्कृधि॒ विश्वे॑भ्यस्त्वेन्द्रि॒येभ्यो॑ दि॒व्येभ्यः॑ पार्थि॑वेभ्य॒ः।

मन॑स्त्वाऽष्टु॒।

उ॒र्व᳚न्तरि॑क्ष॒मन्वि॑हि॒

स्वाहा॑ त्वा सुभव॒ः सूर्या॑य

दे॒वेभ्य॑स्त्वा मरीचि॒पेभ्य॑ः।

[[1-4-3-2]]

ए॒ष ते॒ योनि॑रपा॒नाय॑ त्वा॥

[[1-4-4]]

ऐन्द्रवायवग्रहः॥ सोम ऋषिः।

[[1-4-4-1]]

आ वा॑यो भूष शुचिपा॒ उप॑ नः स॒हस्रं॑ ते नि॒युतो॑ विश्ववार। उपो॑ ते॒ अन्धो॒ मद्य॑मयामि॒ यस्य॑ देव दधि॒षे पू॑र्वपेय॑म्॥

उ॒प॒या॒मगृ॑हीतो ऽसि वा॒यव॒े त्वा।

इन्द्र॑वायू इ॒मे सु॒ताः। उप॒ प्रयो॑भि॒रा ग॑त॒मिन्द॑वो वा॒मुशन्ति॒ हि।

उ॒प॒या॒मगृ॑हीतो ऽसीन्द्रवा॒युभ्यां॑ त्वै॒ष ते॒ योनि॑ः स॒जोषा॑भ्यां त्वा॥

[[1-4-5]]

मैत्रावरुणग्रहः॥ सोम ऋषिः।

[[1-4-5-1]]

अ॒यं वां॑ मित्रावरुणा सु॒तः सोम॑ ऋतावृधा। ममेदि॒ह श्रु॑त॒ꣳ हव॑म्॥

उ॒प॒या॒मगृ॑हीतो ऽसि मि॒त्रावरु॑णाभ्यां त्वै॒ष ते॒ योनि॑र्ऋता॒युभ्यां॑ त्वा॥

[[1-4-6,7]]

अश्विनग्रहः॥सोम ऋषिः।

[[1-4-6-1]]

या वां॒ कशा॒ मधु॑म॒त्यश्वि॑ना सू॒नृता॑वती। तया॑ य॒ज्ञं मि॑मिक्षतम्॥

उ॒प॒या॒मगृ॑हीतो ऽस्य॒श्विभ्यां॑ त्वै॒ष ते॒ योनि॒र्माध्वी॑भ्यां त्वा॥

[[1-4-7-1]]

प्रा॒त॒र्युजौ॒ वि मु॑च्येथा॒मश्वि॑ना॒वेह ग॑च्छतम्। अ॒स्य सोम॑स्य पी॒तये॑॥

उपयामगृहीतो ऽस्यश्विभ्यां त्वैष ते योनिरश्विभ्यां त्वा॥
[[1-4-8]]

शुक्रग्रहः॥ सोम ऋषिः।
[[1-4-8-1]]

अयं वेनश्चोदयत् पृश्निगर्भा ज्योतिर्जरायू रजसो विमाने। इममपाꣳ सङ्गमे सूर्यस्य शिशुं न विप्रा मतिभी रिहन्ति॥

उपयामगृहीतो ऽसि शण्डाय त्वैष ते योनिर्वीरतां पाहि॥
[[1-4-9]]

मन्थिग्रहः॥ सोम ऋषिः।
[[1-4-9-1]]

तं प्रत्नथा पूर्वथा विश्वथेमथा ज्येष्ठतातिं बर्हिषदꣳ सुवर्विदम्। प्रतीचीनं वृजनं दोहसे गिराऽऽशुं जयन्तमनु यासु वर्धसे॥

उपयामगृहीतो ऽसि मर्काय त्वैष ते योनिः प्रजाः पाहि॥
[[1-4-10]]

आग्रयणग्रहः॥ सोम ऋषिः।
[[1-4-10-1]]

ये देवा दिव्येकादश स्थ पृथिव्यामध्येकादश स्थाप्सुषदो महिनैकादश स्थ ते देवा यज्ञमिमं जुषध्वम्।

उपयामगृहीतो ऽस्याग्रयणो ऽसि स्वाग्रयणो जिन्व यज्ञं जिन्व यज्ञपतिमभि सवना पाहि विष्णुस्त्वां पातु विशं त्वं पाहीन्द्रियेणैष ते योनिर्विश्वेभ्यस्त्वा देवेभ्यः॥
[[1-4-11]]

भ्रातृव्यवत आग्रयणग्रहः॥ सोम ऋषिः।
[[1-4-11-1]]

त्रिꣳशत्त्रयश्च गणिनो रुजन्तो दिवꣳ रुद्राः पृथिवीं च सचन्ते। एकादशासो अप्सुषदः सुतꣳ सोमं जुषन्ताꣳ सवनाय विश्वे॥

उपयामगृहीतो ऽस्याग्रयणो ऽसि स्वाग्रयणो जिन्व यज्ञं जिन्व यज्ञपतिमभि सवना पाहि विष्णुस्त्वां पातु विशं त्वं पाहीन्द्रियेणैष ते योनिर्विश्वेभ्यस्त्वा देवेभ्यः॥
[[1-4-12]]

उक्थ्यग्रहः॥ सोम ऋषिः
[[1-4-12-1]]

उपयामगृहीतो ऽसीन्द्राय त्वा बृहद्वते वयस्वत उक्थायुवे यत्त इन्द्र बृहद्वयस्तस्मै त्वा विष्णवे त्वैष ते योनिरिन्द्राय त्वोक्थायुवे॥
[[1-4-13]]

ध्रुवग्रहः॥ सोम ऋषिः।
[[1-4-13-1]]

मूर्धानं दिवो अरतिं पृथिव्या वैश्वानरमृताय जातमग्निम्। कविꣳ सम्राजमतिथिं जनानामासन्ना पात्रं जनयन्त देवाः॥

उपयामगृहीतो ऽस्यग्नये त्वा वैश्वानराय ध्रुवो ऽसि ध्रुवक्षितिर्ध्रुवाणां ध्रुवतमो ऽच्युतानामच्युतक्षित्तम एष ते योनिरग्नये त्वा वैश्वानराय॥

[[1-4-14]]

ऋतुग्रहाः॥ सोम ऋषिः।

[[1-4-14-1]]

मधुश्च माधवश्च शुक्रश्च शुचिश्च नभश्च नभस्यश्चेषश्चोर्जश्च सहश्च सहस्यश्च तपश्च तपस्यश्च।

उपयामगृहीतो ऽसि

सꣳसर्पो ऽसि।

अꣳहस्पत्याय त्वा॥

[[1-4-15]]

ऐन्द्राग्नग्रहः॥ सोम ऋषिः।

[[1-4-15-1]]

इन्द्राग्नी आ गतꣳ सुतं गीर्भिर्नभो वरेण्यं अस्य पातं धियेषिता॥

उपयामगृहीतो ऽसीन्द्राग्निभ्यां त्वैष ते योनिरिन्द्राग्निभ्यां त्वा॥

[[1-4-16]]

वैश्वदेवग्रहः॥ सोम ऋषिः।

[[1-4-16-1]]

ओमासश्चर्षणीधृतो विश्वे देवास आ गत। दाश्वाꣳसो दाशुषः सुतम्॥

उपयामगृहीतो ऽसि विश्वेभ्यस्त्वा देवेभ्य एष ते योनिर्विश्वेभ्यस्त्वा देवेभ्यः॥

[[1-4-17]]

पूर्वा मरुत्वतीयग्रहः॥ सोम ऋषिः।

[[1-4-17-1]]

मरुत्वन्तं वृषभं वावृधानमकवारिं दिव्यꣳ शासमिन्द्रम्। विश्वासाहमवसे नूतनायोग्रꣳ सहोदामिह तꣳ हुवेम॥

उपयामगृहीतो ऽसीन्द्राय त्वा मरुत्वत एष ते योनिरिन्द्राय त्वा मरुत्वते॥

[[1-4-18]]

उत्तरमरुत्वतीयग्रहः॥ सोम ऋषिः।

[[1-4-18-1]]

इन्द्र मरुत्व इह पाहि सोमं यथा शार्याते अपिबः सुतस्य। तव प्रणीती तव शूर शर्मन्ना विवासन्ति कवयः सुयज्ञाः॥

उपयामगृहीतो ऽसीन्द्राय त्वा मरुत्वत एष ते योनिरिन्द्राय त्वा मरुत्वते॥

[[1-4-19]]

तृतीयमरुत्वतीयग्रहः॥ सोम ऋषिः।

[[1-4-19-1]]

म॒रुत्वा॑ꣳ इन्द्र वृष॒भो रणा॑य॒ पिबा॒ सोम॑मनुष्व॒धं मदा॑य। आ सि॑ञ्चस्व ज॒ठरे॒ मध्व॑ ऊ॒र्मिं त्वꣳ राजा॑ऽसि प्र॒दिवः॑

सु॒ताना॑म्॥

उ॒प॒या॒मगृ॑हीतो॒ ऽसीन्द्रा॑य त्वा म॒रुत्व॑त ए॒ष ते॒ योनि॒रिन्द्रा॑य त्वा म॒रुत्व॑ते॥
[[1-4-20]]

माहेन्द्रग्रहः॥ सोम ऋषिः।
[[1-4-20-1]]

म॒हाꣳ इन्द्रो॒ य ओज॑सा प॒र्जन्यो॑ वृष्टि॒माꣳ इ॑व। स्तोमै॑र्व॒त्सस्य॑ वावृधे॥

उ॒प॒या॒मगृ॑हीतो ऽसि म॒हेन्द्रा॑य त्वै॒ष ते॒ योनि॑र्म॒हेन्द्रा॑य त्वा॥
[[1-4-21-1]]

म॒हाꣳ इन्द्रो॑ नृ॒वदा च॑र्षणि॒प्रा उ॒त द्वि॒बर्हा॑ अ॒मिनः॒ सहो॑भिः। अ॒स्म॒द्रिय॑ग्वावृधे वी॒र्या॑यो॒ रुः पृ॒थुः सुकृ॑तः क॒र्तृभि॑र्भूत्॥

उ॒प॒या॒म गृ॑हीतो ऽसि म॒हेन्द्रा॑य त्वै॒ष ते॒ योनि॑र्म॒हेन्द्रा॑य त्वा॥
[[1-4-22]]

आदित्यग्रहः॥ सोम ऋषिः।
[[1-4-22-1]]

क॒दा च॒न स्त॒रीर॑सि॒ नेन्द्र॑ सश्चसि दा॒शुषे॑। उपो॒पेन्नु म॑घव॒न् भूय॒ इन्नु॒ ते॒ दानं॑ दे॒वस्य॑ पृच्यते॥

उ॒प॒या॒मगृ॑हीतो ऽस्यादि॒त्येभ्य॑स्त्वा

क॒दा च॒न प्र यु॑च्छस्यु॒भे नि पा॑सि॒ जन्म॑नी। तुरी॑याऽऽदित्य॒ सव॑नं त इन्द्रि॒यमा त॑स्थाव॒मृतं॑ दि॒वि॥

य॒ज्ञो दे॒वानां॒ प्रत्ये॑ति सु॒म्नमादि॑त्यासो॒ भव॑ता मृडय॒न्तः॑। आ व॒ ः
[[1-4-22-2]]

अ॒र्वाची॑ सु॒मति॑र्ववृत्याद॒ꣳहोश्चि॒द्या व॑रिवो॒वित्त॒राऽस॑त्॥

विव॑स्व आदित्यै॒ष ते॑ सोमपी॒थस्तेन॑ मन्दस्व॒ तेन॑ तृप्य तृ॒प्यास्म॑ ते व॒यं त॑र्पयि॒तारो॒ या दि॒व्या वृ॒ष्टिस्तया॑ त्वा श्रीणामि॥
[[1-4-23]]

सावित्रग्रहः॥ सोम ऋषिः।
[[1-4-23-1]]

वा॒मम॒द्य स॑वितर्वा॒मम॑मु॒ श्वो दि॒वेदि॑वे वा॒मम॒स्मभ्य॑ꣳ सावीः। वा॒मस्य॒ हि क्षय॑स्य दे॒व भूरे॑र॒या धि॒या वा॑म॒भाजः॑ स्याम॥

उ॒प॒या॒मगृ॑हीतो ऽसि दे॒वाय॑ त्वा सवि॒त्रे॥
[[1-4-24]]

सावित्रग्रहः॥ सोम ऋषिः।
[[1-4-24-1]]

अद॑ब्धेभिः सवितः पा॒युभि॒ष्ट्वꣳ शि॒वेभि॑र॒द्य परि॑ पाहि नो॒ गय॑म्। हिर॑ण्यजिह्वः सुवि॒ताय॒ नव्य॑से॒ रक्षा॒ माकि॑र्नो॑ अ॒घश॑ꣳस

ईशत॥

उ॒प॒या॒मगृ॑हीतो ऽसि दे॒वाय॑ त्वा सवि॒त्रे॥
[[1-4-25]]

सावित्रग्रहः॥ सोम ऋषिः।
[[1-4-25-1]]

हिरण्यपाणिमूतये सवितारमुप ह्वये। स चेत्ता देवता पदम्॥

उपयामगृहीतो ऽसि देवाय त्वा सवित्रे॥
[[1-4-26]]

वैश्वदेवग्रहः॥ सोम ऋषिः।
[[1-4-26-1]]

सुशर्मासि सुप्रतिष्ठानः।

बृहदुक्षे नमः।

एष ते योनिर्विश्वेभ्यस्त्वा देवेभ्यः॥
[[1-4-27]]

पात्नीव्रतग्रहः॥ सोम ऋषिः।
[[1-4-27-1]]

बृहस्पतिसुतस्य त इन्दो इन्द्रियावतः पत्नीवन्तं ग्रहं गृह्णामि।

अग्ना३इ पत्नीवा३ः सजूर्देवेन त्वष्ट्रा सोमं पिब स्वाहा॥
[[1-4-28]]

हरियोजनग्रहः॥सोम ऋषिः।
[[1-4-28-1]]

हरिरसि हारियोजनो हर्योः स्थाता वज्रस्य भर्ता पृश्नेः प्रेता तस्य ते देव सोमेष्टयजुष स्तुतस्तोमस्य शस्तोक्थस्य

हरिवन्तं ग्रहं गृह्णामि

हरीः स्थ हर्योर्धानाः सहसोमाः।

इन्द्राय स्वाहा॥
[[1-4-29]]

आग्नेयोऽतिग्रहः॥ सोम ऋषिः।
[[1-4-29-1]]

अग्न आयूꣳषि पवस आ सुवोर्जमिषं च नः। आरे बाधस्व दुच्छुनाम्

उपयामगृहीतो ऽस्यग्नये त्वा तेजस्वत एष ते योनिरग्नये त्वा तेजस्वते॥
[[1-4-30]]

ऐन्द्रोऽतीग्रहः॥ सोम ऋषिः।
[[1-4-30-1]]

उत्तिष्ठन्नोजसा सह पीत्वा शिप्रे अवेपयः। सोममिन्द्र चमू सुतम्॥

उपयामगृहीतो ऽसीन्द्राय त्वौजस्वत एष ते योनिरिन्द्राय त्वौजस्वते॥
[[1-4-31]]

सौर्यो॑ऽतिग्रहः॥ सोम ऋषिः।

[[1-4-31-1]]

त॒रणि॑र्वि॒श्वद॑र्शतो ज्यो॒तिष्कृद॑सि सूर्य। विश्व॒मा भा॑सि रोच॒नम्॥

उ॒प॒या॒मगृ॑हीतो ऽसि॒ सूर्या॑य त्वा॒ भ्राज॑स्वत ए॒ष ते॒ योनि॒ः सूर्या॑य त्वा॒ भ्राज॑स्वते॥

[[1-4-32]]

संगाहनम्॥ सोम ऋषिः।

[[1-4-32-1]]

आ प्या॑यस्व मदिन्तम॒ सोम॒ विश्वा॑भिरू॒तिभि॑ः। भवा॑ नः स॒प्रथ॑स्तमः॥

[[1-4-33]]

अवगाहनम्॥ सोम ऋषिः।

[[1-4-33-1]]

ई॒युष्टे ये पूर्व॑तरा॒मप॑श्यन् व्यु॒च्छन्ती॑मु॒षसं॒ मर्त्या॑सः। अ॒स्माभि॑रू॒ नु प्र॑ति॒चक्ष्या॑ऽभू॒दो ते य॑न्ति॒ ये अ॑प॒रीषु॒ पश्या॑न्॥

[[1-4-34]]

ओषणम्॥ सोम ऋषिः।

[[1-4-34-1]]

ज्योति॑ष्मतीं त्वा सादयामि

ज्योति॒ष्कृत॑ं त्वा सादयामि

ज्योति॒र्विद॑ं त्वा सादया॒मि

भास्व॑तीं त्वा सादया॒मि

ज्वल॑न्तीं त्वा सादयामि

मल्मला॒भव॑न्तीं त्वा सादया॒मि

दीप्य॑मानां त्वा सादया॒मि

रोच॑मानां त्वा सादया॒मि

अज॑स्रां त्वा सादयामि

बृ॒हज्ज्यो॑तिषं त्वा सादयामि

बो॒धय॑न्तीं त्वा सादया॒मि

जाग्र॑तीं त्वा सादयामि॥

[[1-4-35]]

स्रुवाहुतयः। विश्वेदेवा ऋषयः

[[1-4-35-1]]

प्र॒या॒साय॒ स्वाहा॑ऽऽया॒साय॒ स्वाहा॑ विया॒साय॒ स्वाहा॑ संया॒साय॒ स्वाहो॑द्या॒साय॒ स्वाहा॑ ऽवया॒साय॒ स्वाहा॑ शु॒चे स्वाहा॒

शोका॑य॒ स्वाहा॑ तप्य॒त्वै स्वाहा॒ तप॑ते॒ स्वाहा॑ ब्रह्मह॒त्यायै॒ स्वाहा॒ सर्व॑स्मै॒ स्वाहा॑॥

[[1-4-36]]

राजगवीहोमः। विश्वेदेवा ऋषयः

[[1-4-36-1]]

चित्तꣳ संतानेन भवं यक्ना रुद्रं तनिम्ना पशुपतिꣳ स्थूलहृदयेनाग्निꣳ हृदयेन रुद्रं लोहितेन शर्वं मतस्नाभ्यां महादेवमन्तः पार्श्वेनौषिष्ठहनꣳ शिङ्गीनिकोश्याभ्याम्॥

[[1-4-37]]

षोडशिग्रहः॥ सोम ऋषिः।

[[1-4-37-1]]

आ तिष्ठ वृत्रहन् रथं युक्ता ते ब्रह्मणा हरी। अर्वाचीनꣳ सु ते मनो ग्रावा कृणोतु वग्नुना॥

उपयामगृहीतो ऽसीन्द्राय त्वा षोडशिन एष ते योनिरिन्द्राय त्वा षोडशिने॥

[[1-4-38]]

षोडशिग्रहः॥ सोम ऋषिः।

[[1-4-38-1]]

इन्द्रमिद्धरी वहतो ऽप्रतिधृष्टशवसमृषीणां च स्तुतीरुप यज्ञं च मानुषाणाम्

उपयामगृहीतो ऽसीन्द्राय त्वा षोडशिन एष ते योनिरिन्द्राय त्वा षोडशिने॥

[[1-4-39]]

षोडशिग्रहः॥ सोम ऋषिः।

[[1-4-39-1]]

असावि सोम इन्द्र ते शविष्ठ धृष्णवा गहि। आ त्वा पृणक्त्विन्द्रियꣳ रजः सूर्यं न रश्मिभिः॥

उपयामगृहीतो ऽसीन्द्राय त्वा षोडशिन एष ते योनिरिन्द्राय त्वा षोडशिने॥

[[1-4-40]]

षोडशिग्रहः॥ सोम ऋषिः।

[[1-4-40-1]]

सर्वस्य प्रतिशीवरी भूमिस्त्वोपस्थ आऽधित। स्योनाऽस्मै सुषदा भव यच्छास्मै शर्म सप्रथाः॥

उपयामगृहीतो ऽसीन्द्राय त्वा षोडशिन एष ते योनिरिन्द्राय त्वा षोडशिने॥

[[1-4-41]]

षोडशिग्रहः॥ सोम ऋषिः।

[[1-4-41-1]]

महाꣳ इन्द्रो वज्रबाहुः षोडशी शर्म यच्छतु। स्वस्ति नो मघवा करोतु हन्तु पाप्मानं यो ऽस्मान्द्वेष्टि॥

उपयामगृहीतो ऽसीन्द्राय त्वा षोडशिन एष ते योनिरिन्द्राय त्वा षोडशिने॥

[[1-4-42]]

षोडशिग्रहः॥ सोम ऋषिः।

[[1-4-42-1]]

सजोषा इन्द्र सगणो मरुद्भिः सोमं पिब वृत्रहञ्छूर विद्वान्। जहि शत्रूꣳरप मृधो नुदस्वाथाभयं कृणुहि विश्वतो नः॥

उ॒प॒या॒मगृ॑हीतो॒ ऽसीन्द्रा॑य त्वा षोड॒शिन॑ ए॒ष ते॒ योनि॒रिन्द्रा॑य त्वा षोड॒शिने᳚॥
[[1-4-43]]

दक्षि॑णा॥ सोम ऋषिः।
[[1-4-43-1]]

उदु॒ त्यं जा॒तवे᳚दसं दे॒वं व॑हन्ति के॒तवः॑। दृ॒शे विश्वा॑य॒ सूर्य᳚म्॥

चि॒त्रं दे॒वाना॒मुद॑गा॒दनी॑कं॒ चक्षु॑र्मि॒त्रस्य॒ वरु॑णस्या॒ग्नेः। आऽप्रा॒ द्यावा॑पृथि॒वी अ॒न्तरि॑क्ष॒ꣳ॒ सूर्य᳚ आ॒त्मा जग॑तस्त॒स्थुष॑श्च॥

अ॒ग्ने नय॑ सु॒पथा॑ रा॒ये अ॒स्मान् विश्वा॑नि देव व॒युना॑नि वि॒द्वान्। यु॒यो॒ध्य॑स्मज्जु॑हुरा॒णमेनो॒ भूयि॑ष्ठां ते॒ नम॑उक्तिं विधेम॥

दिवं᳚ गच्छ॒ सुवः॑ पत

रू॒पेण॑॥
[[1-4-43-2]]

वो रू॒पम॒भ्यैमि॒ वय॑सा॒ वयः॑।

तु॒थो वो᳚ वि॒श्ववे॑दा॒ वि भ॑जतु॒ वर्षि᳚ष्ठे॒ अधि॒ नाके᳚।

ए॒तत्ते᳚ अ॒ग्ने राध॒ ऐति॒ सोम॑च्युत॒म्।

तन्मि॒त्रस्य॑ प॒था न॑य॒।

ऋतस्य॑ प॒था प्रेत॑ च॒न्द्रद॑क्षिणा य॒ज्ञस्य॑ प॒था सु॑वि॒ता नय॑न्तीः।

ब्रा॒ह्म॒णम॒द्य रा॑ध्यास॒मृषि॑मार्षे॒यं पि॑तृ॒मन्तं᳚ पैतृम॒त्यꣳ सु॒धातु॑दक्षिण॒म्।

वि सु॒वः॑ पश्य॒ व्य॑न्तरि॑क्ष॒म्।

यत॑स्व सद॒स्यैः᳚।
[[1-4-43-3]]

अ॒स्मद्दा॑त्रा दे॒व॒त्रा ग॑च्छत॒ मधु॑मतीः प्रदा॒ता॒रमा वि॑श॒तान॑वहाया॒स्मान् दे॑व॒याने॑न प॒थेत॑ सु॒कृतां᳚ लो॒के सीद॑त॒

तन्नः॑ सꣳस्कृ॒तम्॥
[[1-4-44]]

समिष्टयजुर्हो᳚मः॥ सोम ऋषिः।
[[1-4-44-1]]

धा॒ता रा॒तिः स॑वि॒तेदं जु॑षन्तां प्र॒जाप॑तिर्नि॑धि॒पति॑र्नो᳚ अ॒ग्निः। त्वष्टा॒ विष्णुः॑ प्र॒जया॑ सꣳररा॒णो यज॑मानाय॒ द्रवि॑णं दधातु॥

समि॑न्द्र णो॒ मन॑सा नेषि॒ गोभिः॒ सꣳ सू॒रिभि॑र्म॑घव॒न्त्सꣳ स्व॒स्त्या। सं ब्रह्म॑णा दे॒वकृ॑तं॒ यदस्ति॒ सं दे॒वानाꣳ᳚ सु॒मत्या

य॒ज्ञिया॑नाम्॥

सं वर्च᳚सा॒ पय॑सा॒ सं त॒नूभि॒रग॑न्महि॒ मन॑सा॒ सꣳ शि॒वेन॑। त्वष्टा॑ नो॒ अत्र॒ वरि॑वः कृणो॒तु॥
[[1-4-44-2]]

अनु॑ मार्ष्टु त॒नुवो॒ यद्विलि॑ष्टम्॥

यद॒द्य त्वा॑ प्रय॒ति य॒ज्ञे अ॒स्मिन्नग्ने॒ होता॑र॒मवृ॑णीमही॒ह। ऋध॑गया॒डृध॑गु॒ताश॑मिष्ठाः प्रजा॒नन् य॒ज्ञमुप॑ याहि वि॒द्वान्॥

स्व॒गा वो॑ दे॒वाः सद॑नमकर्म॒ य आ॑ज॒ग्म सव॑ने॒दं जु॑षा॒णाः। ज॒क्षि॒वाꣳसः॑ प॒पि॒वाꣳस॑श्च॒ विश्वे॒ ऽस्मे ध॑त्त वसवो॒ वसू॑नि॥

याना॑ऽव॑ह उश॒तो दे॑व दे॒वान् तान्॥

[[1-4-44-3]]

प्रेर॑य॒ स्वे अ॑ग्ने स॒धस्थे॑। वह॑माना॒ भर॑माणा ह॒वीꣳषि॒ वसु॑ घ॒र्मं दि॒वमा ति॑ष्ठ॒तानु॑॥

यज्ञ॑ य॒ज्ञं ग॑च्छ य॒ज्ञप॑तिं गच्छ॒ स्वां योनिं॑ गच्छ॒ स्वाहा॑।

ए॒ष ते॑ य॒ज्ञो य॑ज्ञपते स॒हसू॑क्तवाकः सु॒वीर॒ः स्वाहा॑

देवा॑ गातुविदो गा॒तुं वि॒त्त्वा गा॒तुमि॑त

मन॑सस्पत इ॒मं नो॑ देव दे॒वेषु॑ य॒ज्ञꣳ स्वाहा॑ वा॒चि स्वाहा॒ वाते॑ धाः॥

[[1-4-45]]

अवभृतः॥ सोम ऋषिः।

[[1-4-45-1]]

उ॒रुꣳ हि राजा॒ वरु॑णश्च॒कार॒ सूर्या॑य॒ पन्था॒मन्वे॑त॒वा उ॑। अ॒पदे॒ पादा॒ प्रति॑धातवे ऽकरु॒ताप॑व॒क्ता हृ॑द॒या॒विध॑श्चित्॥

श॒तं ते॑ राजन् भि॒षजः॑ स॒हस्र॑मु॒र्वी ग॑म्भी॒रा सु॑म॒तिष्टे॑ अस्तु। बाध॑स्व॒ द्वेषो॒ निर्ऋ॑तिं परा॒चैः कृ॒तं चि॒देनः॒ प्र मु॑मुग्ध्य॒स्मत्

अ॒भिष्ठि॑तो॒ वरु॑णस्य॒ पाशः॒।

अ॒ग्नेरनी॑कम॒प आ वि॑वेश। अ॒पां नपा॑त्प्रति॒रक्ष॑न्नसु॒र्यं॑ दमे॑दमे॥

[[1-4-45-2]]

स॒मिधं॑ यक्ष्यग्ने। प्रति॑ ते जि॒ह्वा घृ॒तमुच्च॑रण्येत्

स॒मु॒द्रे ते॒ हृद॑यम॒प्स्व॑न्तः। सं त्वा॑ विश॒न्त्वोष॑धीरु॒ताऽऽपो॑ य॒ज्ञस्य॑ त्वा यज्ञपते ह॒विर्भिः॑। सू॒क्त॒वा॒के न॑मोवा॒के वि॑धेम।

अव॑भृथ निचङ्कुण नि॒चेरु॑रसि निचङ्कु॒णाव॑ दे॒वैर्दे॒वकृ॑त॒मेनो॑ ऽया॒डव॒ मर्त्यै॒र्मर्त्य॑कृतमु॒रोरा नो॑ देव रि॒षस्पा॑हि

सु॒मि॒त्रा न॒ आप॒ ओष॑धयः॥

[[1-4-45-3]]

स॒न्तु दु॒र्मि॒त्रास्तस्मै॑ भूयासु॒र्यो॑ ऽस्मान्द्वेष्टि॒ यं च॑ व॒यं द्वि॒ष्मः।

देवी॑राप ए॒ष वो॒ गर्भ॒स्तं व॒ः सुप्री॑त॒ꣳ सुभृ॑तमकर्म दे॒वेषु॑ नः सु॒कृतो॑ ब्रूता॒त्

प्रति॑युतो॒ वरु॑णस्य॒ पाशः॒ प्रत्य॑स्तो॒ वरु॑णस्य॒ पाशः॒।

एधो॑ ऽस्येधिषी॒महि॑ स॒मिद॑सि॒ तेजो॑ ऽसि॒ तेजो॒ मयि॑ धेहि।

अ॒पो अन्व॑चारिष॒ꣳ रसे॑न॒ सम॑सृक्ष्महि॒ पय॑स्वाꣳ अग्न॒ आऽग॑म॒ं तं मा॒ सꣳ सृ॑ज॒ वर्च॑सा॥

[[1-4-46]]

काम्ययाज्यापुरोऽनुवाक्याः

[[1-4-46-1]]

यस्त्वा॑ हृ॒दा की॒रिणा॒ मन्य॑मा॒नो ऽम॑र्त्यं॒ मर्त्यो॒ जोह॑वीमि। जात॑वेदो॒ यशो॑ अ॒स्मासु॑ धेहि प्र॒जाभि॑रग्ने अमृत॒त्वम॑श्याम्॥

यस्मै॒ त्वꣳ सु॒कृते॑ जातवेद॒ उ लो॒कम॑ग्ने कृ॒णव॑ः स्यो॒नम्। अ॒श्विन॒ꣳ स पु॒त्रिणं॑ वी॒रव॑न्तं॒ गोम॑न्तꣳ र॒यिं न॑शते स्व॒स्ति॥

त्वे सु पुत्र शवसो ऽवृत्रन् कामकातयः। न त्वामिन्द्राति रिच्यते॥

उक्थौक्थे सोम इन्द्रं ममाद नीथेनीथे मघवानम्॥

[[1-4-46-2]]

सुतासः। यदीꣳ सबाधः पितरं न पुत्राः समानदक्षा अवसे हवन्ते॥

अग्ने रसेन तेजसा जातवेदो वि रोचसे। रक्षोहाऽमीवचातनः॥

अपो अन्वचारिषꣳ रसेन समसृक्ष्महि। पयस्वाꣳ अग्न आऽगमं तं मा सꣳ सृज वर्चसा॥

वसुर्वसुपतिर्हिकमस्यग्ने विभावसुः। स्याम ते सुमतावपि॥

त्वामग्ने वसुपतिं वसूनामभि प्र मन्दे॥

[[1-4-46-3]]

अध्वरेषु राजन्। त्वया वाजं वाजयन्तो जयेमाभिष्याम पृत्सुतीर्मर्त्यानाम्॥

त्वामग्ने वाजसातमं विप्रा वर्धन्ति सुष्टुतम्। स नो रास्व सुवीर्यम्॥

अयं नो अग्निर्वरिवः कृणोत्वयं मृधः पुर एतु प्रभिन्दन्। अयꣳ शत्रूञ्जयतु जर्हृषाणो ऽयं वाजं जयतु वाजसातौ॥

अग्निनाऽग्निः समिध्यते कविर्गृहपतिर्युवा। हव्यवाड् जुह्वास्यः॥

त्वꣳ ह्यग्ने

[[1-4-46-4]]

अग्निना विप्रो विप्रेण सन्त्सता। सखा सख्या समिध्यसे॥

उदग्ने शुचयस्तव

वि ज्योतिषा॥

इति प्रथम काण्डे चतुर्थः प्रपाठकः